श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४०

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४०

*पूतनामोक्षवर्णनम्*

तदनु नन्दममन्दशुभास्पदं नृपपुरीं करदानकृते गतम्।
समवलोक्य जगाद भवत्पिता विदितकंससहायजनोद्यमः॥ १ ॥

अयि सखे तव बालकजन्म मां सुखयतेऽद्य निजात्मजजन्मवत्।
इति भवत्पितृतां व्रजनायके समधिरोप्य शशंस तमादरात्॥ २ ॥

इह च सन्त्यनिमित्तशतानि ते कटकसीम्नि ततो लघु गम्यताम्।
इति च तद्वचसा व्रजनायको भवदपायभिया द्रुतमाययौ॥ ३ ॥

अवसरे खलु तत्र च काचन व्रजपदे मधुराकृतिरङ्गना।
तरळषट्पदलाळितकुन्तळा कपटपोतक ते निकटं गता॥ ४ ॥

सपदि सा हृतबालकचेतना निशिचरान्वयजा किल पूतना।
व्रजवधूष्विह केयमिति क्षणं विमृशतीषु भवन्तमुपाददे॥ ५ ॥

लळितभावविलासहृतात्मभिर्युवतिभिः प्रतिरोद्धुमपारिता।
स्तनमसौ भवनान्तनिषेदुषी प्रददुषी भवते कपटात्मने॥ ६ ॥

समधिरुह्य तदङ्कमशङ्कितस्त्वमथ बालकलोपनरोषितः।
महदिवाम्रफलं कुचमण्डलं प्रतिचुचूषिथ दुर्विषदूषितम्॥ ७ ॥

असुभिरेव समं धयति त्वयि स्तनमसौ स्तनितोपमनिस्वना।
निरपतद्भयदायि निजं वपुः प्रतिगता प्रविसार्य भुजावुभौ॥ ८ ॥

भयदघोषणभीषणविग्रहश्रवणदर्शनमोहितवल्लवे।
व्रजपदे तदुरः स्थलखेलनं ननु भवन्तमगृह्णत गोपिका॥ ९ ॥

भुवनमङ्गळनामभिरेव ते युवतिभिर्बहुधा कृतरक्षणः।
त्वमयि वातनिकेतननाथ मामगदयन् कुरु तावकसेवकम्॥ १० ॥

**********